# Counselling session on Stress management, Coping skills and exam fear

## दिनाङ्कः - २४.०२.२०२०

राष्ट्रियसंस्कृतविद्यापीठेन २४.०२.२०२० दिनाङ्के समेषां छात्राणां कृते सुदृढभारताभियानान्तर्गतं Stress management, Coping skills and exam fear इति विषयमाधृत्य एकदिनात्मकं परामर्शसत्रमायोज्यत । **श्रीमन्तः रमाकान्तशर्ममहोदयाः** मुख्यातिथित्वेन समागमन् । मुख्यातिथयः उद्बोधनं कुर्वन्तः सर्वेषां शिक्षाशास्त्रिशिक्षाचार्यविद्यावारिधिच्छात्राणां कृते विविधसमयेषु मानसिकसन्तापनिवारणाय परीक्षाभयनिवारणाय च क्रियायोगाद्यनेकान् उपायान् उदबोधयन् । विद्यापीठस्य मान्याः कुलपतयः कार्यक्रमस्यास्य आध्यक्ष्यं निरवहन् । आचार्याः च. राघवन्महोदयाः इतरे च विद्यापीठस्य मान्याः अध्यापकाः शिक्षकसहकर्मकराश्च कार्यक्रमे समुपस्थिता आसन् । आहत्य २५० अधिकाः छात्राः कार्यक्रमेऽमुष्मिन् सहभागं स्व्यकुर्वन् । इत्थं परामर्शसत्रमिदं सफलं समपद्यत ।







भाषमाणाः श्रीमन्तः रमाकान्तशर्ममहोदयाः




भाषमाणाः आचार्याः वि. मुरलीधरशर्ममहोदयाः



परामर्शसत्रेऽस्मिन् समवेताः छात्राः अध्यापकाश्च




भाषमाणाः आचार्याः च. राघवन्महोदयाः

# 3k Run

## दिनाङ्कः - २१.०२.२०२०

राष्ट्रियसंस्कृतविद्यापीठेन २१.०२.२०२० दिनाङ्के सुदृढभारताभियानान्तर्गतत्वेन सर्वेषां शारीरिकमानसिकस्वास्थ्यसुदृढतायै 3k Run इति कथ्नन विनूतन:३ किलोमिटर्परिमितं धावनकार्यक्रम: समायोज्यत। प्रात:काले विद्यापीठात् आरभ्य ३ किलोमिटर्परिमितं तिरुपतिनगरं यावत् सर्वे अधावन् । मान्या: कुलपतय: हरितध्वजचालनेन कार्यक्रममु समुदघाटयन् । शरीरमाद्यं खलु धर्मसाधनम् इति धर्मकार्यसाधने शरीरमेव मुख्यं भवति । स्वस्थे शरीरे स्वस्थं मन: । अत: सर्वै: शारीरिकस्वास्थ्याय एतादृशोपक्रम आचर्येतेति अस्मिन् सन्दर्भे मान्या: कुलपतय: समान् उदबोधयन् । आहत्य ३०० अधिका: जना: अस्मिन् कार्यक्रमे भागम् अगृह्णन् ।



धावनकार्यक्रमम् उद्घाटयन्त: मान्या: कुलपतय:



सर्वै: सह धावन्त: मान्या: कुलपतय:








लोभाच्च नान्योऽस्ति रिपु: पृथिव्याम् । There is no worse enemy on this earth than greed.